केन्द्रीय विद्यालय संगठन तिनसुकिया संभाग
पूर्व परिषदीय परीक्षा 2025-26
विषय :- संस्कृतम्   विषय कोड (सीबीएसई):- 119

कक्षा/ Class:-दसवीं -X

प्रश्न पत्र कोड :- QP10SKT01PB25

निर्धारित समय :- 3 घंटे   अधिकतम अंक : 80

सामान्य निर्देश:-

1.कृपया सम्यक्तया निरीक्षणं कुर्वन्तु यत् अस्मिन् पत्रे 8 पृष्ठानि मुद्रितानि सन्ति

2.कृपया सम्यक्तया निरीक्षणं कुर्वन्तु यत् अस्मिन् पत्रे 18 प्रश्नाः सन्ति

3.अस्मिन् प्रश्नपत्रे चत्वारः भागाः सन्ति-

'क' भागः	:	अपठितावबोधनम्	10 अंकाः
'ख' भागः	:	रचनात्मक कार्यम्	15 अंकाः
'ग' भागः	:	अनुप्रयुक्तव्याकरणम्	25 अंकाः
'घ' भागः	:	पठितावबोधनम्	30 अंकाः

4.प्रत्येकं भागम् अधिकृत्य उत्तराणि एकस्मिन् स्थाने क्रमेण लेखनीयानि ।

5.उत्तरलेखनात् पूर्वं प्रश्नस्य क्रमाङ्कः अवश्यं लेखनीयः ।

6.प्रश्नस्य क्रमाङ्कः प्रश्नपत्रानुसारम् एव लेखनीयः ।

7.सर्वेषां प्रश्नानाम् उत्तराणि संस्कृतेन लेखनीयानि ।

प्रश्नानां निर्देशाः ध्यानेन अवश्यं पठनीयाः ।

'क' भागः

अपठितावबोधनम्   (10 अङ्काः)

1	**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** अरुणाचलप्रदेशः, असम, मणिपुर, मेघालय, मिजोरम, नागालैण्ड, त्रिपुरा एवञ्च सिक्किमः इत्येतानि अष्टराज्यानि देशस्य पूर्वोत्तरभागे स्थितानि। एतानि राज्यानि भारतस्य केवलं स्थानविशेषत्वेन न, अपितु सांस्कृतिक-ऐतिहासिक-विविधतायाः कारणेन विशेषमहत्त्वं वहन्ति। एषां प्रदेशानां प्राकृतिकं सौन्दर्यं, समुदायानां विविधता, भौगोलिक-पर्यावरणीयं वैचित्र्यं च देशस्य अन्येभ्यः भागेभ्यः पृथक् अस्ति । पर्वतैः नदीभिः च सुशोभितानि एतानि राज्यानि पूर्वहिमालय-श्रेणिषु पत्काई-नागपर्वत- प्रदेशे च स्थितानि । एतेषु बराक-ब्रह्मपुत्रादि-नद्यः प्रवहन्ति एवञ्च पर्वतश्रेण्यः, पीठस्थलानि, निम्नपर्वताः, उपत्यकाः च अस्मिन् भू-भागे भू-वैविध्यं धारयन्ति । प्राकृतिक सम्पदाभिः समृद्धः अयं प्रदेशः पूर्व-दक्षिणपूर्व-एशियायाः द्वारम् अस्ति। तानि राज्यानि अष्टभ्रातृभगिन्यः इति नाम्ना प्रसिद्धानि सन्ति । तानि एव 'अष्टभगिन्यः' अथवा 'सप्तभगिन्यः एकः भ्राता च' इति कथ्यन्ते।	**10**
	अ.- एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) **(i)** अष्टराज्यानि देशस्य कस्मिन् भागे स्थितानि? (ii) अष्टराज्यानि किं नाम्ना प्रसिद्धानि सन्ति ? (iii) पूर्वोत्तर राज्ये कति भ्राता अस्ति ?	**2x1=2**
	आ.- पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) **(i)** अयं प्रदेशः कस्य द्वारम् अस्ति? **(ii)** पूर्वोत्तर भागे स्थितानि सप्तभगिन्यः किं अस्ति? **(iii)** एतानि राज्यानि किं-किं धारयन्ति?	**2x2=4**
	इ.- अस्य अनुच्छेदस्यकृते उपयुक्तं शीर्षकं संस्कृतेन लिखत।	**1**
	ई.- यथानिर्देशम् उत्तरत - (i) 'अस्मिन् भू-भागे भू-वैविध्यं धारयन्ति।' अस्मिन् वाक्ये क्रियापदं किम् ? (क) अस्मिन् (ख) भू (ग) वैविध्यं (घ) धारयन्ति	**3x1=3**

	(ii) गद्यांशे भ्राता इति पदस्य विलोम पदं किं प्रयुक्तम् ? (क) प्राकृतिकं (ख) कथ्यते (ग) भगिनी (घ) राज्यानि (iii) '"एतानि" इत्यस्य पदस्य विशेष्यपदं किं प्रयुक्तम् ? (क) राज्यानि (ख) त्रिपुरा (ग) परा (घ) एतानि	
	'ख' भागः **रचनात्मक – कार्यम् (15 अङ्काः)**	
2.	**भवतः नाम अधोक्षजः । भवतः परीक्षा समाप्ता अधुना भवान् किञ्चित् विशिष्टं कर्तुम् इच्छति अतः पितुः अनुमतिं प्राप्तुम् अधोलिखिते पत्रे मञ्जूषापदसहायतया रिक्तस्थानानि पूरयतु-** रणवीरच्छात्रावासः, वाराणसीतः दिनाङ्कः.................................. पूज्याः पितृचरणाः! साष्टाङ्गं प्रणमामि। अहमत्र (i).................................... कुशली सन् भवतां कुशलतां भगवन्तं विश्वनाथं प्रार्थये। साम्प्रतम् अहं वाञ्छामि यत् मम वार्षिकी (ii).. मार्चमासस्य (iii).. दिनाङ्के सम्पन्ना भविष्यति । अग्रिमायै कक्षायै पुनर्नामाङ्कनं जूनमासे भविष्यति । पश्चात् मम समीपे मासत्रयस्य (iv).................................. समयः अस्ति। तस्य मासत्रयस्य समयस्य (v)............................... वेदाध्ययनं कर्तुं वाञ्छामि । अतः भवताम् अनुमत्या सह अम्बायाः अपि (vi)................................ वाञ्छामि। यतोहि आधुनिकविषयाणां (vii).....................................सह भारतीयज्ञानस्य अपि अनिवार्यताम् अनुभवामि तच्च (viii)....................................विना न सम्भवति । विशेषाधिकम् गृहागमन-पश्चात् (ix).....................................। पौनः पुन्येन सर्वेभ्यः ज्येष्ठेभ्यः सादरं प्रणामाञ्जलिं समर्पयन् भवताम् उत्तरस्य (x)................................ अस्मि । भवतां पुत्रः अधोक्षजः मञ्जूषा प्रतीक्षायाम्, ज्ञानेन, अनुमतिम्, परीक्षायाः, तस्य , छात्रावासे, अष्टादशे, सदुपयोगाय, वेदाध्ययनम्, चर्चयिष्यामः।	**10x1/2 =5**
3. अ	**प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत –** **मञ्जूषा** बालकाः, वृक्षारोपणम् , कुर्वन्ति , पादपम्, जलपात्रेण, सिञ्चति , पर्यावरणम् , शुद्धम् , खनित्रम्, हरीतिमा, पूष्पाधानी, विद्यालये, बालकः, वृक्षौ ।	**5x1=5**

आ	**अथवा** **शब्दानाम् साहाय्येन निम्नलिखितं विषयम् अधिकृत्य पञ्चभिः संस्कृतवाक्यैः एकम् अनुच्छेदं लिखत -** **"शिक्षा"** **मञ्जूषा** सर्वेषाम्, मानवानाम्, अधिकारः, कर्तव्यानि, साक्षरताम् , विवेकः, विकासम्, करोति, पशुमानवेषु, भेदम्, जनयति |	
4. अ	**मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित संवादं पुनः लिखत –** "परोपकाराय सतां विभूतयः" सुधाकरः - नमस्ते । आगच्छतु भवान् । उपविशतु । अतिथिः - उपविशामि तावत्। भवतः पितृमहोदयाः गृहे न सन्ति किम् ? सुधाकरः - स तु इदानीम् एव चिकित्सालयम् अगच्छत्। अतिथिः – किमर्थं(i)..................................अगच्छत् ? सुधाकरः - नास्ति विशेषं कारणम् । स प्रतिदिनं रुग्णेभ्यः दुग्धं(ii)....................................तत्र गच्छति | अतिथिः – एवम् (iii)..................................दातुम् ! किं प्रतिदिनम् एव ? सुधाकरः - आम्! यदा कदा फलानि अपि नयति । अतिथिः – महान् (iv)..अस्ति | सुधाकरः - किम् अत्र परोपकारः । एतत् तु अस्माकं कर्तव्यम् एव । अतिथिः - धन्योऽहं यत् एतेषाम् अद्य (v)...भविष्यति । सुधाकरः - नहि, नहि। अद्य दर्शनं न भविष्यति यतः सः ततः एव कार्यालयं प्रति गमिष्यति । अतिथिः – (vi)..कदा गच्छति ? सुधाकरः - प्रतिदिनम् अष्टवादने एव । अतिथिः - श्वः अष्टवादने एव आगमिष्यामि। कृपया निवेदय 'तस्य बालमित्रं सुरेन्द्रः आगतः आसीत्'। सुधाकरः - अवश्यमेव कथयिष्यामि । नमस्ते । **मञ्जूषा** दातुम्, परोपकारः, कार्यालयम्, दुग्धम्, चिकित्सालयम्, दर्शनम्।	5x1=5
आ.	**अथवा** **मञ्जूषाप्रदत्तपदैः रिक्तस्थानानि पूरयित्वा अधोलिखित संवादं पुनः लिखत –** **"यातायातनियमानां पालनम्"** (नगेन्द्रः द्विचक्रिकया गच्छति ।) आरक्षकः - विरम विरम! किं न पश्यसि रक्तविद्युत्सङ्केतम् ? नगेन्द्रः – (i)... आरक्षकः - विद्यालयं प्रति गन्तव्यम् इति तु समुचितं कारणं नास्ति । नगेन्द्रः – (ii)... आरक्षकः - परीक्षा अस्ति तर्हि गृहात् दशनिमेषपूर्वम् एव प्रस्थानं करणीयम् । नगेन्द्रः - (iii)... आरक्षकः - कथं क्षमे ? शीघ्रं शतं रूप्यकाणि प्रयच्छ । नगेन्द्रः – (iv)... आरक्षकः - बाढम् ! गच्छ अधुना। भविष्ये कदापि यातायातनियमानाम् उल्लङ्घनं न करणीयम् । भवतां सुरक्षार्थम् एव एते नियमाः सन्ति । नगेन्द्रः –(v)	

	मञ्जूषा i. किं करोमि ? अद्य परीक्षा अस्ति । ii. (विलपन्)कृपया क्षम्यताम्। अद्य तु मम समीपे धनं नास्ति। iii. क्षम्यताम्। विद्यालयं प्रति गन्तव्यम् । विलम्बः जातः अस्ति। iv. उपकृतः अस्मि । भविष्ये कदापि इत्थं न आचरिष्यामि। v. अद्य तावत् क्षम्यताम् ।	
	'ग' भागः **अनुप्रयुक्त – व्याकरणम् (25 अङ्काः)**	
5.अ **आ.**	**अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं संधिच्छेदं वा कुरुत –** (i) **धिग्युष्मान्** इति बकः सर्वान् खगान् वदति । (ii) न **कुर्यादहितं** कर्म स परेभ्यः कदाचन । (iii) कालः भूतं वर्तमानं **भविष्यत् + अपि** जानाति । (iv) **ऋक्+वेदः** विश्वसाहित्ये आदिमः आलेखः अस्ति । **अथवा** **अधोलिखितवाक्येषु रेखाङ्कितपदेषु सन्धिं संधिच्छेदं वा कुरुत –** (i) शक्रः **तत्र + एव** अन्तर्हितः अभवत् । (ii) **एकैकपक्षे** ग्रथितं मणीनां तथापि काको न तु राज हन्सः । (iii) भयङ्करः सर्पः **सहसा + एव** बहिरागतः । (iv) राज्ञः स्वेषु **गात्रेष्वपि** निरासक्तिःआसीत् ।	**4x1=4**
6.	**अधोलिखितवाक्येषु रेखाङ्कितपदानां समस्तपदं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत** (i) सरस्वत्या कोषः **अपूर्वः** वर्तते । (क) न पूर्वः (ख) अ पूर्वः (ग) अपूर्वाणां पूर्वः (घ) पूर्वस्य यस्य पूर्वः (ii) राजा नगरस्य समीपं **दानाय शालाः** अकारयत् । (क)दनाशलाः (ख) दानशालाः (ग) दानशला (घ) दान्शालायाः (iii) काकानाम् ऐक्यं तु **जगत्प्रसिद्धम्** अस्ति । (क)जगतप्र सिद्धम (ख)जगत् प्रसिद्धम् (ग)जगति प्रसिद्धम् (घ) जगतानां प्रसिद्धम् (iv) **अष्टानाम् अध्यायानां समाहारः** व्याकरणस्य महान् ग्रन्थः अस्ति । (क) अष्टअध्याय (ख)अष्टाध्यायीसमाहार (ग) समहाराध्यायी (घ) अष्टाध्यायी	**4x1=4**
7.	**अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चित्वा लिखत –** (i) मम विद्यालये अनेकाः **साहित्यिक** पत्रिकाः आयान्ति । (क)साहित्य +ठक् (ख)साहित्य + तल् (ग)साहित्य +ल्यप् (घ) साहित्य + क्त्वा (ii) गुरोः **गुरुत्वं** वर्णयितुं न शक्यते । (क)गुरू + तल् (ख)गुरु +त्व (ग)गुरु +अनियर् (घ) गुरु + शानच् (iii) बालः **बालाः** च उदयन्तं भास्करम् नमतः। (क) बालः +चाप् (ख) बालः + तल् (ग) बालः +टाप् (घ) बालः + ल्युट्	**4x1=4**

	(iv) अस्माभिः अपरेषां गुणाः एव **अनुकरणीयाः** | (क) अनु +कृ +शानच् (ख) अनु +कृ + तल् (ग) अनु +कृ +शतृ (घ) अनु + कृ + अनियर्	
8.अ आ.	**वाच्यानुसारं मन्जूषायाः उचितपदैः रिक्तस्थानानि पूरयित्वा अधोलिखितं संवादं पुनः लिखत -** संजयः – रमे! किं त्वं प्रातः चतुर्वादने उत्तिष्ठति ? रमा – आम् | मया प्रातः चतुर्वादने (i) ....| संजयः – किं त्वं प्रातः उत्थाय (ii) ...., क्रीडसि,पठसि च ? रमा – आम् अहं प्रातः उत्थाय भ्रमामि, क्रीडामि, पठामि च | संजयः – किं त्वया अभिनयं (iii) ....| **मञ्जूषा** क्रियते , उत्थीयते ,भ्रमसि **अथवा** **वाच्यानुसारं उचितपदैः रिक्तस्थानानि पूरयित्वा वाक्यानि पुनः लिखत –** **(i) सज्जनाः उपविशन्ति |** सज्जनैः .... (उपविश्यते/ उपविश्यन्ते) **(ii) सः आचार्यः भवति |** तेन आचार्येण ....(भव्यते, भूयते) **(iii) विद्यार्थिनः धावन्ति |** विद्यार्थिभिः ....(धाव्यन्ते, धाव्यते)	3x1=3
9	**कालबोधकशब्दैः रिक्तस्थानानि पूरयत –** (i) संजीवः प्रातः ....(5:00) जागर्ति | (ii) हर्दिकः ....(6:45) विद्यालयं गच्छति| (iii) सौम्या ....(5:30) ईशवन्दनां करोति |	3x1=3
10	**मञ्जूषायां प्रदत्तैः उचितैः अव्ययपदैः अधोलिखितवाक्येषु रिक्तस्थानानि पूरयत –** (i) पुत्रशोकसन्तप्ताः युधिष्ठिर, भीमः द्रौपदी .... रणभूमौ प्रविशन्ति । (ii) अग्निः .... दहति मामयं शोकः । (iii) .... असौ क्रूरकर्मा न दण्ड्यते तावत् अहम् इतः न गमिष्यामि । (iv) .... ब्रह्मास्त्रं प्रयुज्यते तर्हि सर्वा पृथ्वी दग्धा स्यात्। **मञ्जूषा** इव, च, यदि, यावत्।	4x1=4
11.	**अधोलिखितवाक्येषु रेखाङ्कित - अशुद्धपदाय उचितंपदं चित्वा वाक्यानि पुनः लिखत –** (क) कस्मिंश्चित् नगरे चन्द्रो नाम भूपति **प्रतिवसतः** स्म । (i) प्रतिवसति (ii) प्रतिवससि (iii) प्रतिवसामि (iv) प्रतिवसन्ति (ख) सूपकाराणां मेषेण सह एषः कलहः नूनं भवतां विनाशकारणं **भवति** । (i) अभवत् (ii) भवतु (iii) भविष्यति (iv) भवेत (ग) यूथपः सर्वान् कपीन् आहूय रहसि **अवदम्** । (i) वदति (ii) वदिष्यन्ति (iii) अवदन् (iv) अवदत्	3x1=3

	'घ' भागः **पठितावबोधनम् (30 अङ्काः)**	
12	**अधोलिखितं गद्यांशं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** कालोऽहम्। अहं खलु कालः । विश्वस्य आत्माहम् । कलयामि गणयामि जगतः आयुः प्रमाणम्। सततं चक्रवत् परिवर्तमानः भूतं वर्तमानं भविष्यदपि च वीक्षमाणः अहमेव साक्षी जगतः उत्पत्तेः विकासस्य प्रलयस्य च। इदं जगत् तु पुनः पुनः जायते विलीयते च परमहं विद्यमानोऽस्य सर्वं क्रियाकलापं पश्यामि । अहो ! किं जानीथ यूयम्, 'कियती प्राचीना इयं सृष्टिः!' नैव! तर्हि शृणुत ध्यानेन । 'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि । चतुर्णां युगानां समूहः एव महायुगम्। एकसप्ततिमहायुगानाम् एकं मन्वन्तरम्। चतुर्दशमन्वन्तराणां समूहः कल्पः । एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते । ब्रह्मणः आयुः शतं वर्षाणि । ' अहो! श्रूयते शंखध्वनिः ! युगादिपर्वणि कस्मिंश्चिद् गृहे नूतनसंवत्सरस्य अभिनन्दनसमारोह आयोज्यते । अद्य कलियुगं तु द्विपञ्चाशत्तमं शतकं प्रविशति । तदैव समारोहारम्भे कश्चन विद्वान् सङ्कल्पवाचनं करोति—	5
	I- एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i). अहम् किं? (ii). युगादिपर्वणि कुत्र नूतनसंवत्सरस्य अभिनन्दनसमारोह आयोज्यते? (iii). कानि युगानि?	**2x1/2=1**
	II- पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) महायुगः किं अस्ति? (ii) कल्पः किं अस्ति? (iii) ब्रह्मणः कं एकं दिनं मन्यते?	**2x1=2**
	III-(अ) निर्देशानुसारम् उत्तरत – (i). 'कृतयुगं त्रेतायुगं द्वापरयुगं कलियुगञ्चेति चत्वारि युगानि' अत्र किं विशेषणपदं अस्ति ? (ii). 'एकः कल्प एव ब्रह्मणः एकं दिनं मन्यते।' अत्र क्रियापदं किं अस्ति ? **अथवा** **(आ) निर्देशानुसारम् उत्तरत –** (i). 'अहो ! किं जानीथ यूयम्, 'कियती प्राचीना इयं सृष्टिः!' अत्र क्रियापदम् किं अस्ति? (ii). 'अहं खलु कालः ।"इत्यस्मिन् पदे कर्तापदं कीं अस्ति?	**2x1=2**
13.	**अधोलिखितपद्ये पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत –** जलबिन्दुनिपातेन क्रमशः पूर्यते घटः । स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ‖ हन्सः श्वेतः बकः श्वेतःको भेदः बक हन्सयोः ।नीरक्षीरविवेके तु हन्सो हन्सः बको बकः ॥	5
	I- एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्) (i). जलबिन्दुनिपातेन क्रमशः किं पूर्यते? (ii). घटः केन प्रकारेण पूर्यते? (iii). हन्सः बकः च किं वर्णौ स्तः?	**2x1/2=1**
	II- पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्) (i) हन्सो हन्सः अस्ति| कथं जानीमः? (ii) श्वेतः वर्णः कौ स्तः? (iii) नीरक्षीरविवेकेन किं भवति?	**2x1=2**
	III-(अ) निर्देशानुसारम् उत्तरत – (i). 'जलबिन्दुनिपातेन क्रमशः पूर्यते घटः' अत्र क्रियापदम् किं अस्ति ? (ii). 'हन्सः श्वेतः' अत्र विशेषण पदं किं अस्ति ? **अथवा** **(आ) निर्देशानुसारम् उत्तरत –** (i). 'बकः श्वेतः' अत्र विशेष्य पदं किं अस्ति? (ii). 'श्वेतः" इतिपदस्य विलोम पदं किम् ?	**2x1=2**

14.	**अधोलिखितं नाट्यान्शं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत-** **सर्वे** – एवम् - **सुधाकरः** - अस्य प्रदेशस्य राजधानी का ? **पर्यटनाधिकारी** - 'ईटानगरम् ' अस्य प्रदेशस्य राजधानी । **श्यामा** - महोदय! अत्रत्यजनजातीनां कानि प्रमुखानि आजीविका - साधनानि ? **पर्यटनाधिकारी** - कृषि: शिल्पकला वनसम्पद् चैव एतेषां प्रमुखानि आजीविकासाधनानि । **रवि:** - मान्यवर! अस्य प्रदेशस्य प्रमुखाः उत्सवाः के ? **पर्यटनाधिकारी** - साधु पृष्टम् । अत्र अनेके प्रमुखोत्सवाः । 'वाङ्चो' जनजातीनां प्रमुखं पर्व 'ओरिया' इति अस्ति । एतत् तु फरवरी इति मासे मान्यते । अस्मिन् अवसरे कृषिभूमिपूजनं सेतुनिर्माणं च सामाजिकं कार्यं क्रियते।'मोपीन' इति अपि कृषिपर्व अस्ति । देवानामपि देवः 'मोपीन' इति कथ्यते । 'होली' सदृशम् एव पर्व इदम्। जनाः परस्परं मुखे कपोले च शालिचूर्णं लिम्पन्ति । इदम् 'अप्रैल' इति मासे मान्यते। 'ओणम्' पर्वसमं 'साड़केन' एकम् अन्यत् पर्व अस्ति । लामासम्प्रदायस्य 'लोसर' इति प्रमुखं पर्व अपि 'फरवरी' इति मासे सम्पद्यते । **हिमांशुः** - अस्माभिः 'मिथुन' इति विषये अपि किञ्चित् श्रुतम् । किं तत् ? **पर्यटनाधिकारी** - 'मिथुनः' गोमहिषसदृशः एकः विशिष्टः राजपशुः अस्ति । **शोभा** - वयम् अत्रत्यानाम् ऐतिहासिकस्थलानां विषये ज्ञातुम् इच्छामः । **I- एकपदेन उत्तरत - (केवलं प्रश्नद्वयम्)** (i). शोभा कस्य विषये ज्ञातुं इच्छामः? (ii). राजपशुः अस्ति? (iii). 'ओरिया' कस्य जनजातीनां प्रमुखं पर्वं अस्ति? **II- पूर्णवाक्येन उत्तरत - (केवलं प्रश्नद्वयम्)** (i) 'वाङ्चो' जनजातिभिः कस्मिन् मासे पर्वः मान्यते? (ii) जनाः परस्परं किं लिम्पन्ति? (iii) 'ओरिया' पर्वस्य अवसरे किं कार्यं क्रियते? **III-(अ) निर्देशानुसारम् उत्तरत –** (i). 'अस्माभिः 'मिथुन' इति विषये अपि किञ्चित् श्रुतम्' अत्र अव्यय पदम् कीं अस्ति? (ii). "एतत् तु फरवरी इति मासे मान्यते ।" अत्र क्रिया किं अस्ति? **अथवा** **(आ) निर्देशानुसारम् उत्तरत –** (i). विशिष्टः राजपशुः अत्र विशेष्य पदं किं अस्ति? (ii). "विशिष्टः राजपशुः अस्ति ।" अत्र कर्तृ किं अस्ति??	**5** **2x1/2=1** **2x1=2** **2x1=2**
15.	**रेखाङ्कित-पदानि आधृत्य प्रश्ननिर्माणं कुरुत –** (क) <u>काम एव **अस्माकं** शत्रुः।</u> (ख) <u>**भारत्याः**</u> कोशः अपूर्वः । (ग) मधुरभाषिणी वाणी <u>**पुरुषं**</u> प्रह्लादयति। (घ) कामः एव <u>**क्रोधं**</u> जनयति । (ङ) <u>**सत्येन**</u> समं सुखं नास्ति ।	**5x1=5**
16.	**मन्जूषायाः साहाय्येन श्लोकस्य भावार्थे रिक्तस्थानानि पूरयित्वा पुनः लिखत –** **जलबिन्दुनिपातेन क्रमशः पूर्यते घटः ।** **स हेतुः सर्वविद्यानां धर्मस्य च धनस्य च ॥** <u>**भावार्थः**</u> -यथा निरन्तरं (i)........................ बिन्दूनां पतनेन रिक्तः अपि घटः (ii).......................भवति तथैव जीवने निरन्तरम् (iii)............................सामान्यः अपि मानवः सर्वप्रकारकं ज्ञानं, (iv)........................, धनं च लभते । **मञ्जूषा** धर्मं, जलस्य, पूर्णः, अभ्यासेन,	**4x1/2=2**

17.	**अधोलिखितेषु स्थूलाक्षरपदानाम् प्रसङ्गानुसारं शुद्धम् अर्थं चिनुत -** **(क)** मेष: **<u>महानसं</u>** प्रविश्य यत् पश्यति तद् भक्षयति । (i) हयशालाम् (ii) मन्दिरम् (iii) पाकशालाम् (iv) भूमौ **(ख)** 'कलहान्तानि **<u>हर्म्याणि</u>** कुवाक्यान्तं च सौहृदम् ।' (i) राजभवनानि (iv) उद्यानानि (iii) मन्दिराणि (iii) झटिति **(ग)** 'अन्यस्मिन् **<u>अहनि</u>** महानसं प्रविष्टः मेष: सूपकारेण ताडितः । (i) रात्रौ (ii) मार्गे (iii) दिवसे (iv) पादेन सह **(घ)** 'तस्य **<u>क्षितौ</u>** प्रलुठतः तृणेषु वह्निज्वालाः समुत्थिताः । ' (i) मार्गे (ii) भूमौ (iii) पाकशालायाम् (iv) एकपदेन	4x1=4
18.	**मन्जूषायाः पदसहायतया रिक्तस्थानानि पूरयित्वा अधोलिखित-कथाम् उत्तरपुस्तिकायां लिखत –** अथ एकदा भगवान् (i)......................... बहुजन्मार्जितपुण्यफलैः शिवीनां राजा अभवत्। स बाल्यात् एव वृद्धोपसेवी, (ii).........................शास्त्रपारङ्गतः च आसीत्। जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः (iii)................................। कारुण्य-औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत्। तत्र अर्थिनां समूहः अन्न-पान - वसन - रजत- सुवर्णादिकानि (iv)..............................वस्तूनि प्राप्य सन्तुष्टः अभवत्। राज्ञः (v)...............................आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म । अथ कदाचित् दानशालासु विचरन् स राजा (vi)...............................सन्तुष्टानाम् अर्थिनां विरलसंख्यां विलोक्य अचिन्तयत् 'मम अर्थिनः तु धनलाभमात्रेण सन्तोषं (vii)..................................। नूनं ते दानवीराः सौभाग्यशालिनः यान् याचकाः शरीरस्य (viii)..................................अपि याचन्ते।' एवं राज्ञः स्वेषु गात्रेष्वपि निरासक्तिं विज्ञाय सकलं ब्रह्माण्डं व्याकुलं सञ्जातम्। **मञ्जूषा-** बोधिसत्त्वः, विनयशीलः, पालयति स्म, अभीष्टानि, दानशीलताम्, बहुधनलाभेन, भजन्ते, अङ्गानि	8x1/2= 4